नं० ५६६६ – घ
मंत्रगर्भमहात्रिपुरसुंदरीस्तोत्रम (क्रम
पत्राणि ३ (त्रीणि) (सम्पूर्णम्)

नं० ४२०६ क
मन्त्रगर्भ महात्रिपुरसुन्दरी स्तोत्र
३ पत्र
कन्नड़

श्रीमंत्रगर्भमहात्रिपुरसुंदरीस्तोत्रम्

१५८



त्रि·सुं·
स्तो·

ॐश्रीमहाविद्यायैनमः कल्याणवृष्टिभिरिवामृतपूरिताभिर्लक्ष्मीस्वयं
वरणमंगलदेवताभिः सेवाभिरंबतवपादसरोजमूलेनाकारिकिंम
नसिभक्तिमत्तोजनानां १ एतावदेवजननिस्पृहणीयमस्तुत्वद्वंदनासु
सलिलस्थगितेपिनेत्रे सान्निध्यमुद्यदरुणायुतिसुंदरस्यत्वद्वियहस्यप
परयासुधयाप्लुतस्य २ ईशित्वभावकलुषाःकतिनामसंतिब्रह्मादयः
प्रतियुगंप्रलयाभिभूताः एकःसएवजननिस्थिरसिद्धिरास्तेयःपादयो
स्तवसकृत्प्रणतिंकरोति लब्ध्वासकृत्त्रिपुरसुंदरितावकीनंकारुण्य
कंदलितकांतिकरंकटाक्षं कंदर्पभावसुभगाःखलुभक्तिभाजः सं
मोहयंतितरुणीर्भुवनत्रयेपि ४ ह्रींकारमेवतवनामगृणंतिवे
दामातस्त्रिकोणनिलयेत्रिपुरेत्रिनेत्रे संस्मृत्ययद्यमभटादिभयं

विहायनंदतिनदनवनेसहलोकपालैः ५ हंतुंपुरामरिगलंपरि-
गीर्णमानःशक्तेःकथंनभवितागरलस्यवेगः नाश्वासनाययदि
मातरिदंतवार्धदेहस्यशश्वदमृतप्लवशीतलस्य ६ सर्वज्ञतां
सदसिवाक्पटुतांप्रसूतेदेवित्वदंघ्रिसरसीरुहयोःप्रणामः किं
चस्फुरन्मुकुटमुज्ज्वलमातपत्रंद्वेचामरेचमहतींवसुधांददाति ७
कल्पद्रुमैरभिमतप्रतिपादनेषुकारुण्यवारिभिरिवांबबलात्कृता
दैः आलोकयत्रिपुरसुंदरिमामनाथंत्वय्येवभक्तिभरितंत्वयिद
त्तदृष्टिं हंतेतरेष्वपिमनांसिनिधायचान्येभक्तिंभजंतिकिलपाम
रदैवतेषु त्वामेवदेविमनसाहमनुस्मरामित्वामेवनौमिजननींश
रणंत्वमेव ८ लक्षेषुसत्स्वपितवांबविलोकितानामालोकय

त्रिपुरसुंदरि मां कथंचित् नूनं मया तु सदृशः करुणैकपात्रं जातो जनिष्यति जनो घनजायते वा १० ह्रींह्रीमिति प्रतिपदं जपतां तवाख्यां किं नाम दुर्लभमिह त्रिपुराधिवासे मालाकिरीटमदवारणमाननीया तान्सेव्यते पट्टमती स्वयमेव लक्ष्मीः ११ संपत्कराणि सकलेंद्रियनंदनानि साम्राज्यदानकुशलानि सरोरुहाक्षि त्वत्सेवनानि दुरितापनयोद्यतानि मामेव मातरनिशं कलयंतु नान्यं १२ कल्पोपसंहृतिषु कल्पित तांडवस्य खंडपरशोः परभैरवस्य पाशांकुशैक्षवशरासनपुष्पबाणसा साक्षिणी विजयते तव मूर्त्तिरेका १३ लग्नं सदा भवतु मातरिदं त्वदीयं तेजः परं बहलकुंकुमपंकशोभि भास्वत्किरीटममृतांशुकलावतंसं मध्ये त्रिकोणमुदितं परमामृतं यत् ।

ह्रींकारमेवतवनामतदेवरूपंतन्नौमिसुंदरिसरोजनिवासशीले ।
यत्तेजसापरिणतिंवियदादिभूतसंपत्तनोतिसरसीरुहसंभवादिः
१५ ह्रींकारत्रयसंपुटेनमहतासंदीपितंभक्तितः स्तोत्रंयःप्रतिवा
सरंतवपुरोमातःपठेन्मंत्रवित् तस्यक्षोणिभुजोभवंतिवशगा-
लक्ष्मीश्चिरस्थायिनी वाणीनिर्भरसूक्तिसारभरिताजागर्तिदीर्घंव
यः १६ इतिश्रीमंत्रगर्भमहात्रिपुरसुंदरीस्तोत्रंसंपूर्णम् ॥ ॥

३

त्रि· सु·
स्तो·

3